# FY-410

Reg. No. : ......................................

Name : ..........................................

## FIRST YEAR HIGHER SECONDARY EXAMINATION, MARCH 2024

Part – II

**SANSKRIT**

Time : 2½ Hours

Cool-off time : 15 Minutes

Maximum : 80 Scores

*निर्देशा :*

- 15 निमेषाः समाश्वाससमयः ।
- प्रश्नान् पठितुम् इच्छानुसारं चयितुम्, उत्तराणि क्रमीकर्तुं च अयं समयः उपयोक्तव्यः ।
- प्रश्नस्य निर्देशान् सश्रद्धं पठित्वा अवगम्य च उत्तराणि लेखनीयानि ।
- प्रश्नानाम् अङ्काः तत्र-तत्र दत्ताः ।
- उत्तरलेखनाय समयः अङ्काः च परिगणनीयः ।

*നിർദ്ദേശങ്ങൾ:*

- 15 മിനിറ്റ് സമാശ്വാസ സമയമാണ്. ഈ സമയം ചോദ്യങ്ങൾ വായിക്കുന്നതിനും ഇഷ്ടമുള്ള ചോദ്യങ്ങൾ തിരഞ്ഞെടുക്കന്നതിനും ഉത്തരങ്ങൾ ആസൂത്രണം ചെയ്യാനും ഉപയോഗിക്കാം.
- ഓരോ ചോദ്യവുമായി ബന്ധപ്പെട്ട നിർദ്ദേശങ്ങൾ ശ്രദ്ധാപൂർവ്വം വായിച്ചു മനസിലാക്കിയ ശേഷം ഉത്തരമെഴുതുക.
- ഓരോ ചോദ്യത്തിനുമുള്ള സ്കോർ അതോടൊപ്പം നൽകിയിരിക്കുന്നു.
- ഉത്തരമെഴുതുമ്പോൾ സമയവും സ്കോറും പരിഗണിക്കണം.



Downloaded from hssreporter.com

**1-8 षट् प्रश्नानाम् उत्तराणि लिखत ।**

**1 – 8 വരെയുള്ള ചോദ്യങ്ങളിൽ ഏതെങ്കിലും 6 എണ്ണത്തിന് ഉത്തരം എഴുതുക. ഒരു സ്കോർ വീതം.** **(6 × 1 = 6)**

कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत ।

1. न्यायात् पथः पदं न प्रविचलन्ति । के ?

   (अलसाः, चोराः, धीराः)

2. कः तमसानद्याः तीरे आश्रमे वासम् आरभत ?

   (वाल्मीकिः, वसिष्ठः, ब्रह्मदेवः)

3. 'मृगाङ्क, ते नमः' – मृगाङ्कः कः ?

   (सूर्यः, चन्द्रः, भूमिः)

4. आयुर्वेदम् अनुसृत्य उत्तमाङ्गः कः ?

   (पादं, शिरः, हस्तः)

5. तर्हि वारणानां वृन्दं ददामि – 'वारण' पदस्य अर्थः कः ?

   (अश्वः, गजः, धेनुः)

6. 'ततः प्रविशति ब्राह्मणरूपेण शक्रः' – शक्रः कः ?

   (अर्जुनः, शल्यः, इन्द्रः)

7. कस्य जन्मदिनं युवजनदिनत्वेन आघुष्यते ?

   (शङ्कराचार्यस्य, विवेकानन्दस्य, रामकृष्णपरमहंसस्य)

8. तत्त्वामृतबिन्दवः – अस्य पाठभागस्य मूलग्रन्थः कः ?

   (अष्टाङ्गहृदयः, कुमारसंभवम्, विवेकचूडामणिः)



Downloaded from hssreporter.com

9. उदाहरणानुसारं पदच्छेदं लिखत । **(2)**

उदा : – मातेव – माता + इव ।

(क) छायेव

(ख) मालेव

10. उपमालङ्कारस्य लक्षणं लिखत । **(2)**

11. अधः प्रदत्तं श्लोकं पठित्वा संबोधनपदद्वयं लिखत । **(2)**

जनयित्रि ! विलोकयाम्यहं
भवतीं मां दधतीं सुवत्सलाम् ।
निजमश्रुभुवं समुज्ज्वला –
मुपयान्तीमनघे ! वसुन्धरे ! ।।

**12-15 त्रयाणां प्रश्नानाम् उत्तराणि लिखत ।**

**12-15 വരെയുള്ള ചോദ്യങ്ങളിൽ ഏതെങ്കിലും 3 എണ്ണത്തിന് ഉത്തരം എഴുതുക. 3 സ്കോർ വീതം.** **(3 × 3 = 9)**

12. प्रदत्तं गद्यभागं पठित्वा क्त्वान्त – ल्यबन्त – तुमुन्नन्त पदानि चित्वा लिखत ।

तस्मात् उभयं परिहृत्य किं नु खलु वक्ष्यामि । तेन हि जित्वा पृथिवीं ददामि । अलमलं वारयितुम् ।

क्त्वान्तम् –

ल्यबन्तम् –

तुमुन्नन्तम् –

13. संस्कृतभाषया अनुवदत ।

(क) വാഗ്ഭടൻ ചരകന്റെ ശിഷ്യൻ ആയിരുന്നു.

Vagbhata was the disciple of Charaka.

(ख) അഷ്ടാംഗഹൃദയത്തിന്റെ രചയിതാവ് വാഗ്ഭടനാണ്.

Vagbhata is the author of Ashtangahridaya.

(ग) അഷ്ടാംഗഹൃദയത്തിൽ 7120 പദ്യങ്ങൾ ഉണ്ട്.

There are 7120 verses in Ashtangahridaya.



Downloaded from hssreporter.com

14. वृत्तलक्षणं योजयित्वा लिखत ।

| क | ख |
|---|---|
| उपेन्द्रवज्रा | जतौ जरौ |
| वंशस्थंम् | तभजा जगौ गः |
| वसन्ततिलकम् | जतजास्ततो गौ |

15. पेटिकातः अलङ्कारः लक्षणं च उचितरीत्या क्रमीकृत्य लिखत ।

| क | ख |
|---|---|
| धूमस्तोमं तमश्शङ्के कोकीविरहशुष्मणाम् | उपमा |
| हंसीव कृष्ण ते कीर्तिः स्वर्गङ्गामवगाहते । | फलोत्प्रेक्षा |
| प्रायोऽब्जं त्वत्पदेनैक्यं प्राप्तुं तोये तपस्यति | वस्तूत्प्रेक्षा |

16. अधोदत्तं गद्यभागं पठित्वा रेखाङ्कित पदानां स्थाने कोष्ठकात् समुचितपदानि उपयुज्य वाक्यं परिवर्त्य लिखत । **(4)**

अथ पितृवनं परितः अवलोक्य तत्र एकं त्वरितं गच्छन्तम् उष्ट्रं दृष्ट्वा विस्मिताः अभवन् । ग्रन्थं निरीक्ष्य तुरीयेण उक्तं – 'इष्टं धर्मेण योजयेत्' इति ।

(श्मशानं, चतुर्थेन, वीक्ष्य, शीघ्रं)

17. प्रदत्तं श्लोकं पठित्वा गद्यक्रमं लिखत । **(4)**

विशिखा निशिताः विरम्यतां
क्षतेमेयात् स्तिमितं न मे मनः ।
पुरतो भ्रम लोकचक्र मां
त्यज सीतामिह तां हतामहो ।।

_______ विशिखाः विरम्यताम् । _______ मे मनः क्षतं न एयात् । अहो लोकचक्र, _______ भ्रम । हतां तां सीतां माम् _______ त्यज ।



Downloaded from hssreporter.com

18. द्वौ नाटकसङ्केतौ अधिकृत्य लघुटिप्पणिं लिखत – **(4)**

(क) नेपथ्यम् ।

(ख) आत्मगतम् ।

(ग) प्रकाशः ।

**19-22 त्रयाणां प्रश्नानाम् उत्तराणि लिखत ।**

**19-22 വരെയുള്ള ചോദ്യങ്ങളിൽ ഏതെങ്കിലും 3 എണ്ണത്തിന് ഉത്തരം എഴുതുക. 5 സ്കോർ വീതം.** **(3 × 5 = 15)**

19. अतीतेषु बहुषु संवत्सरेषु तेनैव मार्गेण प्रत्यागताः ते ऋषयः वनमध्यात् मधुर मनोहरं राममन्त्रम् आकर्ण्य विस्मिताः अतिष्ठन् । मन्त्रध्वनेः प्रभवस्थानम् एकं वल्मीकमिति ज्ञात्वा ते ऋषयः तत् अभञ्जयन् । तदा अतितेजस्विनं कञ्चन मुनिश्रेष्ठं अपश्यन् । तदा ते 'वाल्मीके, उत्तिष्ठ, सिद्धोऽसि' इति अवदन् । निषादत्वात् ऋषित्वं प्राप्तस्य तस्य रत्नाकरस्य पुरतः ऋषयः साष्टाङ्गं प्राणमन् ।

(क) मन्त्रध्वनेः प्रभवस्थानं किम् ?

(ख) निषादत्वात् ऋषित्वं प्राप्तः कः ?

(ग) गद्यभागस्य आशयं स्ववाक्यैः लिखत ।

20. माहेश्वरसूत्राणि क्रमीकृत्य लिखत ।

ऋलृक् ।

ऐ औच् ।

हयवरट् ।

अइउण् ।

ए ओङ् ।



Downloaded from hssreporter.com

21. श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।

अकृत्वा शत्रुसंहारम्
अगत्वाखिल भूश्रियम् ।
राजाहमिति शब्दान्नो
राजा भवितुमर्हति ।।

(क) श्लोकेऽस्मिन् तुमुन्नन्ताव्ययपदं किम् ?

(ख) शब्दान्नो – सन्धत्त ।

(ग) श्लोकस्य आशयं स्ववाक्यैः लिखत ।

22. यथोचितं योजयत ।

| | क | ख |
|---|---|---|
| 1. | विवेकचूडामणिः | पाणिनिः |
| 2. | सीताविचारलहरी | भासः |
| 3. | अष्टाध्यायी | कालिदासः |
| 4. | कुमारसंभवम् | एन्. गोपालपिल्ला |
| 5. | कर्णभारः | शङ्कराचार्यः |

**23-27 प्रश्नेषु चतुर्णां उत्तराणि लिखत ।**

**23-27 വരെയുള്ള ചോദ്യങ്ങളിൽ ഏതെങ്കിലും 4 എണ്ണത്തിന് ഉത്തരം എഴുതുക. 6 സ്കോർ വീതം.** **(4 × 6 = 24)**

23. 'क' विभागे प्रदत्तं श्लोकं 'ख' विभागे प्रदत्तस्य आशयेन सह योजयत ।

| क | ख |
|---|---|
| आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात् ।<br>दिनस्य पूर्वार्धपरार्धभिन्ना छायेव मैत्री खलसज्जनानाम् ।। | परोपकारिणः समृद्धौ विनय-सम्पन्नाः भवन्ति |
| भवन्ति नम्रास्तरवः फलागमैः नवाम्बुभिर्दूरविलाम्बिनो घनाः ।<br>अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम् ।। | अरासिकः पुच्छविषाणहीनः पशुः भवति । |
| साहित्यसङ्गीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः ।<br>तृणं न खादन्नपि जीवमानस्तद् भागधेयं परमं पशूनाम् ।। | दुर्जनसज्जनानां मैत्री दिनस्य पूर्वार्धपरार्ध छाया इव विभिन्ना भवति । |



Downloaded from hssreporter.com

24. कथास्तम्भं क्रमीकृत्य लिखत ।

- वत्सेति संबोधनया निषादस्य मनः आर्द्रम् अभवत् ।
- भार्यायाः प्रतिवचनं निशम्य सः खिन्नः अभवत् ।
- खड्गं प्रसार्य कश्चन निषादः आपतत् ।
- 'तदहं न जाने' इति निषादः प्रत्यवदत् ।
- पश्चात्तापविवशः सः मुनीनां पुरतः अतिष्ठत् ।
- 'पापफलं तव कलत्रपुत्रादयः अनुभवन्ति किम्' इति मुनिः अपृच्छत् ।

25. संभाषणांशान् पूरयित्वा पुनर्लिखत ।

उमा) ________________

रमा) उमे, नमस्ते । कुत्र गच्छसि ?

उमा) ________________

रमा) अहमपि गानालापस्पर्धायां भागं करोमि ।

उमा) ________________

रमा) गानालापनस्पर्धा दशवादाने आरभते ।

उमा) तर्हि शीघ्रं गच्छावः ।

26. अधोदत्तेषु श्लोकेषु इष्टतमश्लोकं चित्वा आस्वादनटीकां लिखत ।

(क) अकिञ्चनः सन् प्रभवः स संपदां
त्रिलोकनाथः पितृसद्मगोचरः ।
स भीमरूपः शिव इत्युदीर्यते
न सन्ति याथार्थ्यविदः पिनाकिनः ।।

(ख) उवाच चैनं परमार्थतो हरं
न वेत्सि नूनं यत एवमात्थमाम् ।
अलोकसामान्यमचिन्त्यहेतुकं
द्विषन्ति मन्दाश्चरितं महात्मनाम् ।।

(ग) अलं विवादेन यथा श्रुतस्त्वया
तथा विधस्तावदशेषमस्तु सः ।
ममात्र भावैकरसं मनः स्थितं
न कामवृत्तिर्वचनीयमीक्षते ।।



Downloaded from hssreporter.com

27. अधोदत्तां खण्डिकां पठित्वा सूक्तित्रयं चित्वा लिखत ।

पश्चात् गच्छन्तस्ते त्रयः कञ्चन जनपदं प्रापुः । ते सर्वे ग्रामीणैः पृथक् स्वगृहं नीतवन्तः । प्रथमः भोजनार्थं सूत्रिकामलभत । सः 'दीर्घसूत्री विनश्यती' ति सूक्तिं विचिन्त्य भोजनमत्यजत् । द्वितीयाय अपूपः दत्तः । अतिविस्तारविस्तीर्णं तद् भवेन्न चिरायुषमित्युक्त्वा भक्षणं विहाय गतः । तृतीयाय माषवटिकां भोजनाय अयच्छत् सोऽपि 'छिद्रेष्वनर्थाः बहुलीभवन्ति' इति उक्त्वा अनश्नन् गतः ।

**28 - 29 प्रश्नेषु एकस्य उत्तरं लिखत ।**

**28 - 29 വരെയുള്ള ചോദ്യങ്ങളിൽ ഏതെങ്കിലും ഒരെണ്ണത്തിന് ഉത്തരം എഴുതുക. (1 × 8 = 8)**

28. समयवाचकशब्दान् उपयुज्य अधः प्रदत्तां दिनचर्यां पुनर्लिखत ।

भद्रा प्रभाते 4:30 वादने उत्तिष्ठति । सा 5 वादने दन्तधावनं करोति । अनन्तरं 5:15 स्नानं कृत्वा योगाभ्यासं करोति । 5:45 वादने पाठं पठति । 7 वादने गृहकार्येषु साहाय्यं करोति । 8:45 वादने विद्यालयं गच्छति । सायं 4:30 वादने विद्यालयात् प्रत्यागत्य 5 वादने क्रीडाङ्गणं गच्छति ।

29. स्वामीविवेकानन्दस्य संदेशान् अधिकृत्य सूचनानुसारं लघूपन्यासं लिखत ।

**सूचनाः**

- प्रायोगिकवेदान्तस्य प्रचारकः
- विश्वधर्मसमारोहः
- विश्वयुवजनदिनम्
- श्रीरामकृष्ण मठः
- भारतीयदर्शनैः प्रचोदितः
- विवेकानन्दस्य सूक्तयः



Downloaded from hssreporter.com